International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(5): 01-04
© 2020 IJSR
www.anantaajournal.com
Received: 05-06-2020
Accepted: 03-08-2020

**डॉ0 दीपाली जैन**
कन्यागुरूकुलमहाविद्यालयः,
गुरूकुलकाँगड़ीविश्वविद्यालयः,
हरिद्वाराम्, उत्तराखण्ड, भारत ।

**डॉ0 वीना विश्नोई शर्मा**
कन्यागुरूकुलमहाविद्यालयः,
गुरूकुलकाँगड़ीविश्वविद्यालयः,
हरिद्वाराम्, उत्तराखण्ड, भारत ।

**Corresponding Author:**
**डॉ0 दीपाली जैन**
कन्यागुरूकुलमहाविद्यालयः,
गुरूकुलकाँगड़ीविश्वविद्यालयः,
हरिद्वाराम्, उत्तराखण्ड, भारत ।

# "वैदिक ग्रन्थेषु प्राकृतिक विधिनां जलसंरक्षणम्"

**डॉ0 दीपाली जैन तथा डॉ0 वीना विश्नोई शर्मा**

## प्रस्तावना

वर्तमानकाले महत्कष्टकरमिदं तथ्यं, यत् सार्वजनिकजलस्थानेषु अमेध्यपदार्थानां विसर्जने न सङ्कोचमनुवभन्ति जनाः । गङ्गासदृशा पवित्रनदी अपि प्रदूषिता वर्तते। येन तस्याः जलं केषुचित्स्थानेषु अस्वास्थ्यकरं जातम् । उक्त–नीतिवचनानि चेदवहिताः पालयेयुः जनाः, तर्हि जलसंरक्षणं प्राकृतिकस्तरे एव भवितुमर्हति । अतः नदीनदसरित्पतिसमुद्रतीरे तज्जले वा शरीरस्य मलत्यागः कदापि न करणीयः –

**नदीनां च प्रतीरे च पत्यश्च सरितां तथा ।**
**शरीरस्य मलत्यागं न कुर्याज्जीवने तथा ।।** [2]

जलं स्वभावतः शोघकं पवित्र पावकंच भवति । अतस्तस्य पवित्रतायाः रक्षणं मानवमात्रस्य कर्तव्यम् । स्मरणीयमस्तु यज्जले मत्स्यादयोः जीवाः निवसन्ति येषां जीवनाघार एव जलं भवति । एते जीवाः मानवानाम् अन्यान्यावश्यकताः पूरयन्तः पोष्याः संरक्ष्याश्च भवन्ति । कमलशैवालादि जलवनस्पतयः जले जाताः मानवैः प्रयुज्यन्ते । अतः तेषां संरक्षणाय जलस्य संरक्षणमावश्यकम् । अतः जलीयपर्यावरणमस्य संरक्षणाय च संस्कृतसाहित्ये भारतीयसंस्कृतेः मूलभूता तीर्थस्य अवघारणा उपस्थापिता। एषा तीर्थकल्पना सम्प्रति घार्मिकस्थाविश्वासाभ्यां संयोज्य अवधार्यते । किन्तु तीर्थस्य तात्पर्यं स्वरूपंच जलसंरक्षरणस्य व्यापकप्रयास एव प्रतीयते । एतदर्थं तीर्थविषयकविवेचनमपेक्षितम् ।

सूर्यः वर्षायाः स्रष्टा उच्यते । यतोहि वर्षार्थं पृथिव्याः समन्ततः स्वरश्मिभिः वाष्परूपेण जलं गृहीत्वा अन्तरिक्षे स्थापयति । तत्र च वायुपर्जन्योः साहाय्येन जलस्य गर्भमिव परिपोषणं करोति [3]। सूर्यः वृष्टिजलस्य दोहनं करोति । अथर्ववेदे उक्तं, यत् सूर्यस्य रश्मयः जलं सर्वतः पृथिव्याः रसरूपेण गृहीत्वा दिवम् उत्पतन्ति, ततश्च यथाकालं वर्षन्ती पृथिवीम् आप्यायितां कुव्न्ति –

**कृष्णं नियानं हरयः सुवर्णाः अपाना दिवमुत्पतन्ति ।**
**त आववृत्रन्त्यसदानादृतस्यादिद् घृतेन पृथिवीं व्यूदुः ।।** [4]

आधुनिकविद्वांसः मेघानां समुद्रतलादुच्चाताम् अनुमाय उच्च – मध्यम – निम्न भेदात् तेषां त्रैविध्यं प्रतिपादयन्ति । षट्सहस्रतः द्वादशसहस्रमीटराणि यावद् उच्चस्थाः उच्चमेघाः (High Clouds) पक्षाभाः (Cirrus) पक्षाभस्तरीयाः (Cirro Stratus) पक्षाभकपासीयाः (Cirrocumulù) इति त्रिविघाः भवन्ति । एते पुष्करावर्तका मेघा एवेति तत्स्वरूपं चिन्तनीयम् । समुद्रमलात् सार्घद्विसहस्रतः षङ्सहस्रमीटराणि यावदुच्चस्थाः मध्यममेघा अपि प्रसरणशीलाः ।

ज्योतिः सलिलवायूनां सङ्घातरूपेषु मेघेषु स्थितान् जलकणायन् वायुः गमनशीलो भवति । मरुद्गणानां परस्परं सङ्घर्षणेन विद्युद् द्योतते । [4] मेघे उपलरूपं जलम् विदारयति –

**अहन् वृत्रमृचीषम् और्णवा□अहीशुवम् ।**
**हि ने नाविध्यदर्बुदम् ।** [7]

### कुंजीशब्दा

जलसंरक्षण, जलशोधन, ध्रुवेणाधिष्ठितजलं, क्षतेः संरक्षा, संसाधन, संदोहन, उपभोगम, विवेकपूर्वकं, पक्षाभाः, पक्षाभस्तरीयाः, पक्षाभकपासीयाः।

### आमुख

उपलब्ध–वस्तुनः यथास्वरूपं सर्वथा प्रक्षणं सरंक्षणम् उच्यते । उपभोग्य–प्राकृतिकसंसाधनानां निरन्तरम् उपभोगेन तेषु सम्भाव्यमानायाः गुणात्मक–परिमाणात्मक–क्षतेः संरक्षा (च्तमअमदजपवद) प्रतिपूर्तिश्च संरक्षणस्य मूलमन्त्रं भवति । लोकप्रवाहे पूर्व–पूर्व मानवानां पश्चाज्जातान् मानवान् प्रति एतद् दायित्वं भवति, यत् ते संसाधनानि आवश्यकतानुसारम् उपभुज्य आगामिमनुष्याणामुपभोगाय त्यजन्तु (समर्पयन्तु) । यतोहि प्रकृतिः सर्वेषामपि पृथिवीवासिनां सम्पत् भवति । अतः प्रकृतेः उपभोगः सह – भावनया करणीयः । भारतीय–चिन्तनस्य पृष्ठभूमिः 'संगच्छध्वं संवदध्वं सं वो मनांसि जानताम्' इति विचारे निहिता अस्ति । केवलाघो भवति केवलादी इति वैदिकोद्घोषो वर्तते । ईशावास्योपनिषदि तु सर्वमपि जडचेतनम् ईशावास्यम् इति उद्घोष्य त्यागभावनया भोगस्यापदेशो विहितः । [8] एवं लोभरहितभोगः उपभोग्यानां संरक्षणाय भवेत् ।

### शोधस्य विधि

प्रस्तुत शोधपत्रः मुख्यतः गुणात्मकं शोधकर्मे निर्भरमास्ति। अस्मिन् शोधपत्रे प्राथमिक द्वितीयक च स्रोतयो उपयोगानामास्ति। वैदिकग्रन्थेषु संस्कृतवाङ्मये च प्राकृतिक विधिनां जलसंरक्षणं, वर्तमान समये अस्य प्रासंगिकता उल्लेखनीयमास्ति।

अत्र जलसंरक्षणम् अस्य महत्वम् स्थापितुम् प्रकृतेः सम्बन्धमश्च प्रयासश्चास्ति। वर्तमानकाले मानवीय संवेदनाम् वांछितस्तरे जागृताय निष्कर्षम् प्राप्तुम प्रयासास्ति।

### विवेचना

यद्यपि सृष्टेः सकलजलराशिः अन्यूनानतिरिकतो भवति, किन्तु नानारूपतया अन्यकारकाणां सापेक्षतया च प्रतिवर्षं वर्षायाः वितरण् असामानम् अस्ति । जनसंख्यायाः अनुदिनं वृद्धितया अधिक – पेयजलस्य आवश्यकता भवति, किन्तु प्राकृतिकस्रोतभ्यः पर्याप्तं प्रयोगयोग्यं जलम् उत्तरोत्तरं न्यूनतामेति । भूतलेऽपि मानवानाम् अनुदारा प्रवृत्तिः जलस्य अविवेकपूर्णायोगेन मृदुजलस्य अभावे हेतुः । वर्तमानसमये औद्योगिक–अपशिष्टानां प्रवाहः नद्यादीनां शुद्धताम् अल्पीकरोति । जलाशयादीनां समीपे मानववसतिः विविधप्रकारेण मलविसर्जनं करोति । एवं जल–प्रदूषणं वर्तमानसमस्यासु प्रमुखं संजातम् । अतः सार्वजनिकरूपेण जलस्रोतसां दीर्घकालिकोपयोगाय तथा उपायाः विधेयाः, यथा जलभाण्डारे प्रदूषणस्य सम्भावना न्यूनीभूयात्, विश्वस्तरीयजलचक्रे च व्यवधानं मा भूयात् । जलं जीवनभूतं भवति प्राणिनाम् । अतः प्राणिनां प्रजातयः तद्विकासंच जलाश्रितः । एवं जलसंरक्षणस्य मूले तथ्यत्रयं भवितुम् अर्हति –

**पर्यावरणप्रदूषणनियन्त्रणेन लोकानां स्वास्थ्यरक्षा ।**
**जलसंसाधनस्य विवेकपूर्णोपयोगेन तत्प्राप्तेः दीर्घकालीनसम्भावना ।**
**विश्वस्तरीजलवितरणे सन्तुलनम् ।**

जलं पर्यावरणस्य महत्त्वपूर्णं घटकम् अस्ति । पृथिवीमण्डलस्य पर्यावरणनिर्माणे जलं मुख्यतयोत्तरदायि भवति । विशेषतः वायुमण्डलीयजलदशा तापमानं, सस्यसमृद्धिं मानवीयस्वभावं, मनोवृत्तिं च प्रभावितं करोति । पर्यावरणे ब्रह्माण्डेऽवस्थिताः सर्वे पदार्थाः, येषां सम्बन्धः पृथिव्याः जैविकवातावरणेन भवति, गृह्यन्ते । प्रकाशः, वायुः, वर्षा, ऊर्जा, मृद् जलम् इत्यादि कारकेषु साक्षादुपयोगतया वायुः जलंचेति विशेषतः संरक्ष्ये ।

संस्कृतसाहित्ये धर्मशास्त्रे दैनिकाचारे कर्तव्यधर्माणां सङ्ग्रहे पर्यावरणसंरक्षणस्य नैत्यिकविधानमस्ति । नित्यमेव प्राकृतिकतत्त्वानि प्रति स्वदायित्वपालनेन मानवः निरन्तरक्ररूपेण तेषां संरक्षणे समर्थो भवति । सन्दर्भे अस्मिन् पद्मपुराणे, मनुस्मृतौ, विदुरनीतौ, चाणक्यनीतौ अन्यत्र च केचन्मानवधर्मा उक्ताः । तदनुसारं नदीतीरे समुद्रतटे जलाशयानां समीपे च विण्मूत्रष्ठीवनलोहितादिसर्वेषामपि अमेध्यानां पदार्थानां विसर्जनं निषद्धमस्ति ।

**नाप्सु विण्मूत्रमाचरेत् ।** [9]
**नोत्तरेदनुपस्पृश्य नाप्सु रेतः समुत्सृजेत् ।**
**अमेध्यालिप्तमई वा लोहितं वा विषाणि वा ।।** [10]
**यतिक्रामेन्न स्रवन्तीं नाप्सु मैथुनमाचरेत् ।**
**...............नाप्सु ष्ठीबनमाचरेत् ।।** [11]

ससत्त्वेषु गर्तेषु नदीतीरे पर्वतमस्तके च मूत्रविसर्जनं न कुर्यादिति मनुः –

**न ससत्त्वेषु गर्तेषु न गच्छन्नपि न स्थितः ।**
**न नदीतीरमासाद्य न च पर्वतमस्तके ।।**[12]

उक्ताचारगत – निषेधानां तात्पर्यमिदमेव, यत् कुत्रापि जले प्रदूषकराणाम् अपशिष्टानां पदार्थानां विसर्जनं न कुर्यात् ।

घ्रुवेणाधिष्ठितं जलं सूर्यो गृह्णाति । सर्वभूतानां शरीरेषु स्थावर – जङ्गमेषु यस्मिन् – यस्मिन् रूपे जलं तिष्ठति तत्तद्रूपेण सूर्यतापवशात् तेभ्यः – तेभ्यः स्थावरजङ्गमेभ्यः सर्वशः जलं धूमीभूतं निष्क्रामति । तच्च सर्वलोकेभ्यः स्वतेजोभिः (किरणैः) सूर्य आदत्ते –

**घ्रुवेणाधिष्ठिताश्चापः सूर्यो वै गृह्य तिष्ठति ।**
**सर्वभूतशरीरेषु त्वापो ह्यनुश्चिताश्चयाः ।।**
**दह्यमानेषु तेष्वेव जङ्गमस्थावरेषु च ।**
**घूमभूतास्तु ता ह्यापो निष्क्रमन्तीह सर्वशः ।।**
**तेजोभिः सर्वलोकेभ्यः आदत्ते रश्मिभिर्जलम्ः ।**[13]

सूर्येण समुद्राज्जलाहरणे वायुः सहाय्यं करोति । वायुर्हि अवशोषणं करोति । सूयतापेन उष्णो वायुः समुद्राद् वाष्परूपेण जलम् अवशोष्य अन्तरिक्षे नयति । एवं वायुसंयोगाद् रश्मयः जलं वहन्ति –

**समुद्राद्वायुसंयोगाद् वहन्त्यापो ग☐स्तयः ।**[14]

गरुडपुराणे 'आदित्याज्जायते वृष्टिः'[15] इति प्रतिज्ञाय तस्य प्रक्रियायां प्रथमतः रश्मिभिः जलादानं स्मृतम् । मनुस्मृतावपि आदित्याद् वृष्टिरित्युक्तम् ।[16] वृष्टिजलस्य दोग्धृत्वाद् एवं सूर्यः गौरित्युच्यते –

**आयं गौः पृश्निरक्रमीदसदन्मातरं पुरः ।**

अथर्ववेदेऽपि सूर्यः समुद्रेभ्यः वृष्टिजलस्य प्रेरणार्थं स्तूयते –

**प्रजापतिः सलिलादा समुद्रादाप ईरयन्नदधिमर्दयाति ।**
**प्राप्यायतां वृष्णो अश्वस्य रेतोऽर्वाङ्तेन स्तनमित्नुनेहि ।।** [17]

कालिदासेनापि रघुवंशे कुमारसम्भवे च रविणा भौमजलस्याहरणमुक्तम्–

**सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः ।**[18]
**रविपीतजला तपात्यये पुनरोघेन हि युज्यते नदी ।**[19]

वर्षातिरिक्तेषु ऋतुषु आश्विनतः वैशाखमासपर्यन्तम् अष्टामासपर्यन्तं सूर्यः यदा तपति, तर्हि समस्तेऽपि भूमण्डले भूपृष्ठे सागरेषु, जीवनमण्डले च तापप्रभावादूष्मा जायते । तेभ्यश्च सूक्ष्मधूमरूपेण जलं वाष्पीभवति । आपाततः तद्द्रष्टुम् शक्यते । पार्थिवकणैः युक्तः उष्णः वाष्पवाहको वायुः धूमः (ब्तइवद) भवति । निरुक्ते उपर – उपलो मेघ इत्युक्तम् । मेघः आन्तरिक्षजलस्य कोशस्थानीयो भवति । मेघोदरे स्थितं जलम् उपलरूपेण इन्द्रादिभिः देवताभिः (वायुविशेषैः) विविधरूपतामधिगच्छति –

**यासां देवा दिवि कृण्वन्ति □क्षा अन्तरिक्षे बहुधा भवति । [20]**

ज्योतिष्चक्रेण मेघानां सप्तवाय्वपेक्षया सप्तभेदाः भवन्ति । चतुर्दश ऋक्षाणां मण्डले शिशुमारचक्रः स्वयं भ्रमन् अन्यगहैः सह सूर्ययन्त्रं परिक्रामयति । तस्याः परिक्रमायाः परिणामतया जीमूताः नाम मेघा जायन्ते, येभ्यः जीवोत्पत्तिः भवति –

**जीमूता नाम ते मेघा यदेभ्यो जीवसम्भवः । [21]**

जीवाः अति अन्तरिक्षे व्याप्ताः । ज्योतिष्चक्रस्य मन्थनात् मेघः तान् जीवान् पर्यन्यमाध्यमेन सस्ये संप्रवेशयति ततश्चान्नादिभिः मेघः शरीरे तिष्ठन्तः आङ्गिरसभूताः कर्मजन्यादृष्टप्रभावात् तत्तद् योनिं प्राप्नुवन्ति। द्वितीयः अन्तरिक्षे संचरन् 'आवहन्' नाम वायुः मेघानधिसंश्रयते । हिमालयस्योत्तरे दक्षिणे च भागे सम्यग्वृष्ट्यै प्रसिद्धः –

**द्वितीय आवहन्वायुर्मेघास्ते त्वभिसंश्रिताः ।**
**इतो योजनामात्रंच अध्यर्धविकृता अति ।।**
**वृष्टिसर्गस्तथा तेषां धाराधाराः प्रकीर्तिताः ।**
**पुष्करावर्तका नाम ये मेघा पक्षसम्भवाः ।।**
**पुष्करा नाम ते पक्षा बृहन्तस्तोयधारिणः ।**
**पुष्करावर्तका नाम कारणेनेह शब्दिताः ।।**
**षष्ठः परिवहो नाम वायुस्तेषां परायणः ।**
**योऽयो बिभर्ति □ावन् गङ्गामाकाशगोचरम् ।।**
**उदग् हिमवतः शैलस्योत्तरे चैव दक्षिणे ।**
**पुण्ड्रं नाम समाख्यातं सम्यवृष्टिविवृद्धये ।। [22]**

आवहन् नामवायोः पुण्ड्रपर्यन्तं जलपरिपाकस्य प्रक्रिया चलति । अन्तरिक्षे आ समन्तात् वहन् वायुः वाष्पं शीतीकृत्य सङ्घनयति । ततः धाराधाराः वृष्टिसर्गस्य पूर्वावस्था भवति । अस्यामवस्थायां वर्षाजलं मेघे जायते । 'पुष्करावर्तकाः' मेघानां वृद्धा गर्भावस्था भवति । मेघेषु जलवृद्धिः भवति । षष्ठः परिवाहो नाम वायुः पुष्करावर्तकानां परायणः भवति । वस्तुतः उपलरूपमेघानाम् आकारे जलवृद्धिवशात् वृद्धिर्भवति । तदा परितो वाही वायुः मेघस्थं जलं नीहाररूपेण विष्यन्दयति ।[23] नीहारः शीकररूपो भवति । येन–येन मार्गेण दिग्गजैः पर्यन्यरूपैः स्थूलकिरणैः जलं प्रमुच्यते स मार्गो आकाशगंङ्गा इत्युच्यते तस्या विस्फुटिताः धाराश्च नीहारिकाः उच्यन्ते । मेघपरायणो वायुः हिमालयस्य उत्तरदक्षिणयोः वृष्टिविवृद्धिं करोति येन धरातले सम्यग् वर्षा भवति । अयं पुण्ड्रो नाम मेघवायुरेव प्रसिद्धं 'मानसून' इति नाम्ना प्रसिद्धं वातमण्डलं भवेत् ।

नीलाः कपिशा वा लघ्वावरणसदृशाः 'उच्चस्तरीयाः' वर्तुलाकाराः तरङ्गरूपा वा श्वेताः 'उच्चकपासीया' इति द्विधा भवन्ति। समुद्रतलात् सार्धद्विसहस्रमीटरात्मके उच्चपरिमण्डले निम्न–उच्चतायुक्ताः मेघाः भवन्ति। ते च 'स्तरीयकपीसाया' 'कपासीयाश्चेति' द्विधा भवन्ति। स्तरीयाः नीहारवत् अनेकावरणयुक्ताः वर्षास्तरीयाः (छपउइवै.जतंजने) धरातलात् नात्याच्चाः श्यामवर्णाः भवन्ति। कपासीयाश्च (ब्नउनसन) विस्तृताः गुम्बदाकाराः स्वच्छवायुमण्डलस्य द्योतकाः सघनाः उपलवृष्टिकराः तडिज्झंझावातयुक्तवर्षाकारकाः भवन्ति । एवं मुख्याः सप्तप्रकारका मेघाः आघुनिकैः अपि मताः ।

ज्योतिः सलिलवायूनां सङ्घातरूपेषु मेघेषु स्थितान् जलकणायन् वायुः गमनशीलो भवति ।[24] मरुद्गणानां परस्परं सङ्घर्षणेन विद्युद् द्योतते ।[25] मेद्ये उपलरूपं जलम् विदारयति –

**अहन् वृत्रमृचीषम् और्णवा□ाहीशुवम् ।**
**हि ने नाविध्यदर्बुदम् । [26]**

उक्तप्रक्रियाभिः अन्तरिक्षे गर्जन–तर्जन–विद्युद्द्योतनादिरूपेण वर्षानुकूलाः परिस्थितयो जायन्ते ।

वायुमण्डले यदा निम्नस्तरीया वर्षमेघाः इन्द्रेण सम्प्रेर्यमाणाः विदार्यन्ते, तर्हि मेघमण्डले विच्छेदेन मेघाः शकलैः वायुमण्डले संचरन्तः भूमण्डलीयजलवायुना प्रभाविताः भवन्ति । अस्यामवस्थायाम् स्तमितो वायुः वर्षाजलम् अन्तरिक्षे अवरोधयति । अवरोधकत्वाद् मेघः वृत्र इत्युच्यते । इन्द्र वृत्रं हत्वां पर्वतेभ्यः नदीभ्यश्च जलमार्गान् उद्घाटयति ।[27] वायुना सम्प्रेर्यमाणाः यदा पूर्वस्मिन् दृश्यन्ते, तदा ते गर्जनपूर्वकं वर्षाकारकाः भवन्ति । तादृग्मेघेभ्यः वृष्टं जलं पृथिवीं तर्पयितुं स्तुतः ।

**समुत्पतन्तु प्रदिशो न□स्वतीः समभ्राणि वातजूतानि यन्तु ।**
**मह ऋषभस्य नदतो न□स्वतो वाश्रा आपः पृथिवीं तर्पयन्तु ।। [28]**

तजवाहकाः मेघाः इन्द्रेण त्रोट्यमानाः जलं ताडयन्तो नन्दतः अन्तरिक्षे संचरन्ति–

**यददः संप्रयतीरहवनदता हेत । [29]**

अन्तरिक्षे जलनिर्माणानन्तरं यदा मेघाः वायुमण्डले संचरन्ति तदा मरुद्गणैः प्रेर्यमाणो मेघः वायुमण्डलं विष्पन्दितैः शीकरैः आर्द्रं करोति। वायुश्च पुनः तान् शीकरान् संहृत्य संङ्घनितान् करोति । वर्षवेगात्पूर्वं वायोः शैत्यस्य एतदेव कारणं भवति । संस्कृतसाहित्ये इन्द्रवृत्रयोः युद्धस्य या परिकल्पना कृता, सा पूर्ववार्षिकी अन्तरिक्षीयदशा भवति । इन्द्रेण विद्युद्रूपवज्रेण हन्यमानो मेघः यदा शतप्रतिशतम् आर्द्रतां प्राप्नोति, तदा शीकरेषु सङ्घनितं जलं मेघमण्डलस्य विस्तारं करोति ।

## निष्कर्ष

जलसंरक्षणसन्दर्भे चिन्तनीयम्, यत् प्रकृतेः अक्षय भण्डारः अपप्रयोगेण विरूपतां प्राप्तुं शक्नोति । अतः यथावश्यकं विवेकपूर्वकं संसाधनानाम् संदोहनम् उपभोगश्चापेक्ष्यते। वर्तमानसमये निरन्तरं वृद्धिमत्यां सत्यां विश्वजनसङ्ख्यायां प्राकृतिकपदार्थानां संदोहनम् अपेक्षाकृतं बृहत्परिमाणे भवति । एकतः अत्यधिकोपदार्थानां संदोहनम् अपेक्षाकृतं बृहत्परिमाणे भवति । एकतः अत्यधिकोपभोगेन संसाधनेषु क्षरणं तीव्रगत्या जायते । अपशिष्टापवाहाः तत्त्वानि प्रदूषयन्ति तेन च प्रदूषणेन न केवलं तत्तत्त्वस्य स्वरूपे गुणवत्तायांच औपाधिकह्रासो जायते, अपितु पर्यावरणस्य सङ्कटमपि जायते । व्यापकस्तरे पर्यावरणप्रदूषणं जैविकअनुकूलपारस्थैतिकतन्त्रे दुष्प्रभावं पातयति । अतः भौतिकतत्त्वानां मूलरूपे संरक्षणाय मानवेन यथासम्भवं प्रयासो विधेयः ।

भौतिकतत्त्वेषु जलम् एकमात्रमेतादृशं तत्त्वम् अस्ति यस्य सकलराशिः चक्रीयपरिवर्तनेन अक्षय भण्डारतया तिष्ठति । उदारप्रकृतिः वर्षामाध्यमेन पृथिव्यां पर्याप्तं पेयं शुद्धं जलं प्रददाति । किन्तु

वायुमण्डले विद्यमानानां विषालुजैवरासायनिकतत्त्वानां हस्तक्षेपेण पृथिव्याः भूतलपर्यन्तम् आगमने न तथा शुद्धं तिष्ठति । पृथिव्यामपि विविधैः भू–रासायनिककारकैः मृत्सम्पर्काच्च अवांछनीय–विलेयतत्त्वानि जलस्य मौलिक–स्वरूपं विकारयन्ति ।

## आभारोक्ति

प्रस्तुत शोधे ईश्वरकृत वेदानाम् प्राचीन ग्रन्थानाम् च ज्ञानं विभिन्नमाध्यमे प्रसारणम् अकुर्वन्। तेभ्यः वयं आजीवनं आभारी वर्तिष्यामहे।

## संदर्भ

1. कन्यागुरूकुलमहाविद्यालयः, गुरूकुलकॉंगड़ीविश्वविद्यालयः, हरिद्वाराम्, उत्तराखण्ड।
2. पद्मपुराण – सृष्टिखण्डः 51.95–96
3. ऋग्वेदः 6.3.31.1
4. अथर्ववेदः 6.3.22.1
5. ऋग्वेदः 8.37.10
6. तदेव 1.8.38.8
7. तदेव 8.5.32.26
8. ईशावास्योपनिषत् – 1
9. पद्मपुराणम् स्वर्गखण्डः 55.65– मनुस्मृतिः 4.46
10. पद्मपुराण स्वर्गखण्डः – 55.7 नाप्सु मूत्रं पुरीषं वा ष्ठीवनं वा समुत्सृजेत् । अमेध्यलिप्तमन्यद्वालोहितं वा विषाणि वा ।।
11. पद्मपुराण – स्वर्गखण्डः 55.76
12. मनुस्मृतिः 4.47
13. मत्स्यपुराणम् – 124.31
14. मत्स्यपुराण्म् 124.32
15. गरुडपुराणम् – 78.44
16. आदित्याज्जायते वृष्टिः । मनुस्मृतिः – 3.76
17. अथर्ववेदः – 4.3.75.11
18. रघुवंशः – प्रथमः सर्गः
19. कुमारसम्भवः 4.44
20. अथर्ववेदः 1.6.33.3
21. मत्स्यपुराणम् 124.10
22. मत्स्यपुराणम् 124.10,11,13,20,23
23. तस्या विष्यन्दितं तोयं दिग्गजाः पृथुभिः करैः । शीकरान् सम्प्रमुंचन्ति नीहार इति स्मृतः ।। तदेव 124.21–22
24. ऋग्वेदः 8.37.10
25. तदेव 1.8.38.8
26. तदेव 8.5.32.26
27. अथर्ववेदः 2.1.5.5–6
28. तदेव 4.3.15.
29. अथर्ववेदः 3.3.13.1.